# दार्शनिकपण्डितः श्री के.एस्. वरदाचार्यः

**सन्दर्शकः – विद्वान् टि. एन्. प्रभाकरः**



**सन्दर्शकः** – तत्रभवद्भ्यः आचार्येभ्यः प्रणामाः । त्रैमासिकवार्तापत्रिकायै तत्रभवतां सन्दर्शनं कर्तुम् आनन्दम् अनुभवामि । भवन्तः केषाञ्चन प्रश्नानाम् उत्तरदानेन अनुगृह्णन्तु इति प्रार्थयामि ।

**आचार्यः** – अस्तु तावत् । यथामति यते ।

**सन्दर्शकः** – सम्प्रति संस्कृतं सामयिकं वा ?

**आचार्यः** – संस्कृतं न केवलं सम्प्रति, अपि तु भूते भविष्यति सर्वदा च प्रस्तुतम् । विभिन्नक्षेत्रेषु इदानीं अध्ययनसंशोधनयोः वृद्ध्या नूतनज्ञानशाखाः समुद्भूताः । सर्वासाम् एषां ज्ञानशाखानां साक्षात् परम्परया वा संस्कृतभाषायाः, साहित्यस्य, शास्त्रवाङ्मयस्य च निकटः संबन्धः अस्ति । किन्तु ताः शाखाः अवगन्तुम् आवश्यकानि शास्त्राणि पातालं प्रापितानि इति शोचनीयः । उदाहरणं वदामि ।

इदानीं जीवनस्य सर्वेषु क्षेत्रेषु तीव्रगत्या प्रवर्धमानं म्यानेज्मेंट्तन्त्रं कौटिल्यस्य अर्थशास्त्रे, शुक्राचार्यस्य शुक्रनीतिसारे च उपलभ्यते । मानवसम्पन्मूलस्य उपयोगः रामायणे लभ्यते । न केवलं मानवसम्पन्मूलं किन्तु वानरसेनां, भल्लूकसेनां च विरचय्य सम्पन्मूलतया परिवर्त्य उपयुयोज श्रीरामः । देशकालानुसारं वातावरणानुगुणं च शाकफलपुष्पधान्यकृषितन्त्रं शास्त्रेषु विपुलं दृश्यते । एतत् सर्वं लोकोपकारकचिन्तनासरणिः ।

**सन्दर्शकः**–दर्शनशास्त्राणां हीयमानायाः शास्त्रीयपरम्परायाः विषये भवताम् अभिप्रायः कः ?

**आचार्यः** – दर्शनशास्त्राणाम् उद्गमः, विकासः, चिन्तनं च अनुपमम् । सूत्रं, भाष्यं, वार्तिकं, व्याख्यानं, टीका, कारिकेत्यादीनां प्रकाराणां दर्शनात् ज्ञायते यत् प्राचीनानां प्रवृत्तिः स्वतन्त्रा, वस्तुनिष्ठा, चिन्तनशीला च आसीदिति । एतादृशकृतिसहस्रं अवलोक्यते चेत् संस्कृतज्ञानां मतिः कियती तीक्ष्णा इति स्पष्टं भवति । किन्तु शोचनीयो विषयः यत् सम्प्रति तादृशं शास्त्रीयम् आन्तम् अध्ययनं निर्दिष्टविषये वाक्यार्थसभा च न्यूना जाता । कदाचित् तत्र तत्र किञ्चित् शास्त्राध्ययनम् अध्यापनं च प्रवर्तते चेदपि न तत् पर्याप्तम् । शास्त्रग्रन्थानां साक्षात् भाष्यम् अस्ति । सम्प्रति तदध्ययनं नास्ति । किन्तु मध्यकालिकानां व्याख्यानग्रन्थानां कतिपयभागानां च पाठप्रवचनं कथञ्चित् प्रवर्तते । एनां परिस्थितिम् अवलोकयामः चेत् तानि दिनानि एतस्मिन् शतके न सम्भवेयुः इति भाति । गतानि तानि दिनानि ।

**सन्दर्शकः** – पूर्वकालापेक्षया सम्प्रति संस्कृतस्य प्रोत्साहः अधिकः अस्ति इति भावयन्ति वा?

**आचार्यः** – आम् । सर्वकाराः संस्कृतं अधिकतया प्रोत्साहयन्ति । भारतसर्वकारेण संस्कृतस्य कृते शतशः कोटिरूप्यकाणि पञ्चवार्षिकयोजनाङ्गतया प्रदीयन्ते । किन्तु दर्शनशास्त्रस्य इतरज्ञानप्रकारस्य च आमूलाग्रं पाठयितारः न सन्ति । अध्येतारोऽपि न । इत्थं शास्त्राणां प्रौढस्तरीयम् अध्ययनं स्वाप्निकम् । सर्वत्र संस्कृतं भाषात्वेन प्राथमिकस्तरे अत्यल्पप्रमाणेन अधीयते । कर्णाटकसंस्कृत-विश्वविद्यालयोऽपि संस्कृतं भाषारूपेण बोधयितुं नवीनयोजनां निरूपयतु । एतेन संस्कृतस्य प्रथमं सोपानं सुरक्षितं स्यात् ।

**सन्दर्शकः** – द्वैतम्, अद्वैतम्, विशिष्टाद्वैतम्, शक्तिविशिष्टाद्वैतञ्चेति वेदान्ताशाखाः अनुभवैकवेद्याः । किन्तु सम्प्रति अनुभवमन्तरा मिथः कलहः प्रवर्तते खलु ?

**आचार्यः** – सामयिकोऽयं प्रश्नः । उपनिषत्, ब्रह्मसूत्रं भगवद्गीतेति प्रस्थानत्रयम् अधिकृत्य यथानुभवं आचार्यैः व्याख्यारूपेण भाष्यं विरचितम् । तदधीत्य, तत्त्वं अनुसन्धाय च साक्षात्कर्तव्यम् । अयमेव जीवनस्य चरमं ध्येयम् । सः साक्षात्कारः शततमं सोपानम् । वयन्तु द्वितीयं तृतीयं वा सोपानं आरूढाः । अप्रत्यक्षं दृश्यं यथाकथञ्चित् ऊहयित्वा वादविवादे निमग्नाः । खण्डनाय मण्डनाय च असङ्ख्याताः लेखाः ग्रन्थाश्च प्रकाशिताः । रागद्वेषाः वर्धिताः । मनश्शान्तिः नैव लब्धा । एतस्मिन् अवसरे अयम् अंशः स्मर्तव्यः ।

**शमार्थं सर्वशास्त्राणि विहितानि मनीषिभिः ।**

**स एव सर्वशास्त्रज्ञः यस्य शान्तमिदं मनः ॥**

**सन्दर्शकः** – वेदशास्त्राधिकारः सीमितो वा ?

**आचार्यः** – सर्वथा न । आसक्तास्सर्वे अधिकारिणः । जनानां मनांसि समीकर्तुं संस्कर्तुं च वेदशास्त्राणि प्रवृत्तानि । अतः आसक्ताः सर्वे वेदशास्त्राध्ययनं कुर्युः । महिलाः अपि अधिकारिण्यः इति न पुनर्वक्तव्यं किल?

**सन्दर्शकः** – तत्रभवताम् अध्ययनकालः कीदृशः आसीत् किं किञ्चित् उच्येत?

**आचार्यः** – अहो! अवश्यम् । मन्नामानौ उभौ दिवङ्गतौ । ई.एस्. वरदाचार्यः मीमांसकः, एस्. वरदाचार्यः वैयाकरणः च मम सतीर्थ्यौ । वयं वरदत्रयम् इति प्रथिताः । अस्माकं गुरवः दीक्षाचार्याः । वयं गृहात् संस्कृतपाठशालां प्रति पद्भ्याम् एव अगच्छाम । गमनकाले सूत्रभाष्ययोः आवृत्तौ अस्माकं प्रवृत्तिः आसीत् । एतत् दृष्ट्वा गृहस्थाः हसन्तः वदन्ति स्म – तेषां वृक्षाणामपि सूत्रभाष्यं कण्ठस्थं जातम् इति । तदा अस्माकम् एकांशः एव कार्यक्रमः । स च शास्त्रचिन्तनम् । न भूतभविष्यतोः चिन्ता । स्वाध्यायं तप इति अस्माकं भावना आसीत् ।

**सन्दर्शकः** – गुरुकुलस्थापनस्य उद्देशः कः ?

**आचार्यः** – इदं प्रायोगिकं गुरुकुलम् । नेपालीयः उद्यमपतिः प्रतिमासं विंशति–सहस्ररूप्यकानुदानं प्रयच्छति । तेषां सदाशयेन इदं गुरुकुलं प्रचलति । अत्र नेपालीयाः छात्रा एव शास्त्राध्ययननिरताः । ज्ञानदृष्ट्या न, परीक्षादृष्ट्या ।

**सन्दर्शकः** – धन्योऽस्मि ।